This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशाय नमः॥ अथाभीष्टधनुःखंडेन प्रथमनूनसूतस्तेनैव निघ्नो यः परिधिः स प्रथमाहूयः स्यात्॥
प्रथम इति आहूयं नाम यस्य स तथा॥ एवं तं प्रथमं तैः संज्ञमंकमनष्टस्थापयेत्॥ अथ परिधिवर्ग-चतुर्थभागः प-
८८०॥ -चाहतः कार्यसेन आद्यो निर्मितेन चतुर्घ्नमासानं प्रथमं भजेत् इह यद्राप्तं साज्यकास्यात्॥ परिधिवर्ग-चतुर्थभागः
पंचाहतः प्रथमसंसोनित अभसनूभाजको भवति तथा प्रथमसंज्ञस्य चतुर्घ्नमासहतः सनूभाज्यः स्यात्तस्य
फलं साभीष्टधनुःखंडस्य जीवा भवतीत्यर्थः॥ अत्रोपपत्तिः॥ तत्र वृत्तांतर्व्यासे रेखायां कृतायां वृत्तस्य विभागद्व
यं भीततत्रो द्विष्टं यत्परिधिखंडं तत्स्याप्येवमभीष्टपरिध्यर्द्धस्यापेशेषाधिते स हि चापोनं परिध्यर्धमवशेषं स्यात्
अथ चापोनपरिध्यर्द्धस्य च वर्गयोगाभ्याम भीष्टजीवा साध्यते॥ यतो वक्ष्यमाणेनुपाते चतुर्गुणास समिता या जीवा
तस्याभ्यापमुक्तवर्गयोगेनतुल्यं भवति॥ अथानुपातः यदि चापोनपरिध्यर्द्धस्य च चतुर्गुणवर्गयोगमितेन धनुष
चतुर्गुणास समिता जीवा लभ्यते तदा तयोर्वर्गांतरेण किमिति अत्र प्रमाणयोर्गुणकभाजकयोरानयनार्थं मा
चार्येण प्रकारांतरं दृष्टं॥ तद्यथा॥ चापोनानि घ्नपरिधिस्तच्चापोनपरिध्यर्द्धस्य परिध्यर्द्धस्य वर्गांतरं भवति॥
यतः चापोनः परिधिस्तयोर्योगो भवति चापं च तयोरंतरं तथान्ययोगांतराहति वर्गांतरं भवति॥ तस्य प्रथम
इति संज्ञा कृता॥ अथ तयोर्वर्गयोग आनीते॥ तत्र परिधिवर्ग-चतुर्थभागो हि परिध्यर्धवर्गो भवति सपंचाहत

Acc. No: ~~११४~~ M1011
Title:- ~~अभीस्थधनु~~ अभीष्टधनु
Subject:- Ritual
पत्रे:- (८)

KKSU LIBRARY RAMTEK 441 106 M1011 Dist. Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सन् स्वांघ्रियुतः परिधिवर्गस्तस्मात्सथमोपलक्षितवर्गांतरेणोधिते सति परिध्यर्द्धवर्गांतरयोरंतरेण परिधिवर्गोय
जितः स्यात्॥ स एव च चतुर्गुणो वर्गयोगः प्रमाणत्वेन ज्ञातः अथ च चतुर्गुणव्यासो हि वर्गांतरोपलक्षितया इच्छया गुणितः
प्रमाणेन भक्तो लब्धमभीष्टजीवा स्यात्॥ यथात्र लघुवृत्तं कल्पितं अत्र परिधिः ३६ व्यासः १२ परिधिचतुर्थांशो धनुःक
ल्पितं ९ अथ चापोनपरिध्यर्द्धं परिध्यर्द्धयोर्न्यासः ९।१८ अनयोर्वर्गयोगवियोगौ ४०५।२४३ अत्र वर्गयोगश्चतु
र्भिर्गुणितः १६२० अयं वर्गांतरसन्न् जातं प्रमाणं १३७७ अथ वर्गांतरं २४३ चतुर्गुणव्यासेन ४८ गुणितं ११६६४
प्रमाणेनानेन भक्तं लब्धा जीवा ८ अथ चापोननिघ्नपरिधिः २४३ इदमेव वर्गांतरं अथ परिधिवर्गः १२९६
अथ स्य चतुर्भागो जातः परिध्यर्द्धवर्गः ३२४ असौ पंचाहतः सन् स्वांघ्रियुतः परिधिवर्गो जातः १६२० अयं वर्गां
तरेण पुनः सन्न् जातः प्रमाणराशिः स एव १३७७ शेषं पूर्ववदेवोपपन्नं॥ एवमत्र सर्वस्य पिलघूपाये श्राचार्यैः कर्मज्ञा
उपायं कथं विहितं तल्लविभः अतोस्माभिस्तु कृतगणिते प्रकारत्रयेण जीवानयनं कृतं॥ अत्रोदाहरणं वृत्तेनाह॥ अष्टादशां
शेनेति॥ यत्र वृत्तेरष्टादशांशेन एकादिनिघ्नेन समानं चापं पृथगस्ति तत्र पृथग्भुजीवां वद इति॥ वृत्तेः परिधेरष्टादशां
शकादिनवांतैः पृथग्गुणितः सन्न्व चापानि भवंति तेषां जीवा पृथग्वद इत्यर्थः॥ अथ व्यासमाह॥ खार्कैरिति॥ यत्र वृत्ते व्या
सदलं खार्कैर्मितं ननतीते॥ एवं व्यासदलं द्विगुणं व्यासो भवतीत्यर्थः॥ न्यासः व्यासदलं १२० व्यासः २४० उक्तय स्थूलपर्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिः ७५४ अस्याष्टादशांशः ४२ इयमेकादिभिः संगुण्य एवं क्रमेण जातानि चापानि ॥ ४२
८४।१२६।१६८।२१०।२५२।२९४।३३६।३७८। अथैतानि सुखार्थं परिध्यष्टादशांशेनैव ४२
परिधिर्धनूंषि चापवर्तितानि ॥ तत्र परिधिः १८ धनूंषि १।२।३।४।५।६।७।८।९ अथ परिधिः ७५६
अयं प्रथमचापेनोनः ७१२ तथा चापेन वगुणितः २९९०४ अयं प्रथमसंज्ञः ॥ अथ परिधिः ७५६
अस्य वर्गः ५७१५३६ अस्य चतुर्थभागः १४२८८४ अयं पंचाहतः ७१४४२० अयं प्रथमसंज्ञेन
२९९०४ ऊनः सन् जातो भाजकः ६८४५१६ अथ प्रथमः २९९०४ असौ चतुर्घ्नः आसेन १६० गुणितः
१९१३८५६० पूर्वभाजकेन भक्तः सन् लब्धा प्रथमधनुषो जीवा ४२ एवं सर्वत्रांतरत्वानुसक्तं ॥
अथवा परिधिः १८ प्रथमचापं च १ अथ चापोननिघ्नपरिधिर्जातः १७ प्रथमः अथ परिधिवर्गः ३२४
अस्य चतुर्थभागः ८१ पंचाहतः ४०५ अयमाद्योनितः सन् जातो भाजकः ३८८ अथाद्यः १७ चतुर्घ्नः ६८
व्यासेन गुणितः १६३२० भाजकेन हृतः सन् लब्धा सैव जीवा ४२ एवं जाताः सर्वधनुषि जीवाः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८२।१२०।१५४।१८४।२०८।२२६।२३६।२४० म्रहगुणिते जीवाविवरा र्द्धानां मेवोपयोगादेतासा

मंतराणि ४२।४०।३८।३४।३०।२४।१८।१०।४।८ षामर्द्धानि जातानिन्यास्खंडानि २१।२०।१९।१७।१५।१२।९

५।२। अनेनैव प्रकारेणाचार्येण करणे पु पनिवद्धं रूपाब्धिनो विंशति रंक चंद्रा इति॥ अथ जीवात

व्यापानयनार्थं सूत्रं वृत्तेनाह॥ व्यासाब्धिघातेति॥ परिधेर्वर्गः जीवांप्रिपं चगुणितः सन् व्यासाब्धि

भिअ५ घातयुतमोर्विकया विभक्तः कार्यः॥ परिधिवर्गस्क जीवांप्रिपं चगुणितः तथा चतुर्गुण व्यासयुतजी

वया भक्तस्तत्र यल्लब्धं तेनरुनितात् परिधिवर्गचतुर्थभागात् सकाशात् यत् तस्य मूले तस्मिन् पति

दलात् परिधेपतितेरोधिते सति धनुः स्यादित्यर्थः॥ अत्रोपपत्तिः॥ पूर्वं वृत्तं तव्यासरेखायां

कृतायां वृत्ताद्धोपलक्षितपरिध्यर्द्धमितस्य धनुषो व्यासमिताज्या जीवा भवति॥ प्रकृते तु परिध्यर्द्धं ॥२॥

धनुः खंडद्वयं भवति तत्रैकस्य धनुःखंडस्य जीवा आनता स्ति सैव स्य चरणयुता ऽपर धनुः खंडस्य

जीवा कल्पिता॥ तस्याः सकाशात् पर धनुः खंडसमानीयते॥ तत्रानुपातः॥ यदि चतुर्गुणैर्व्यास

(९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युतजीवामितज्यया परिधिवर्गमितं धनुस्तर्हि सा त्रिज्ययाकि मि सत्र प्रथम परिधिवर्गः प्रथमजीवां त्रि
णागुणितोनंतरं पंचभिर्गुणितः स च स्यात्रियुतया जीवये व गुणितो भवति॥ तस्य चतुर्गुणव्यासयुतजीवया
भागहृते यल्लब्धं तस्मात धनुःखंड परिध्यर्द्धयोर्वर्गांतरं भवति तस्ये तरिध्यर्द्धवर्गाद्धो ध्यते तर्हि अपर
धनुःखंडस्य वर्गोवशिष्यते॥ यतः परिधिवर्गचतुर्थभागो हि परिध्यर्द्धवर्गो भवतीति प्रागेवोक्तं॥ एवमप
र धनुःखंडवर्गस्य मूलमपर धनुःखंडं तत्परिध्यर्द्धाद्धो ध्यते तदभीष्टं धनुःखंडमवशिष्यत इत्युपपन्नं॥
अत्रोदाहरणं वृत्तेनाह॥ विदिता इति॥ इत पूर्वोदाहरणे ये गुणाः विदितास्तेषामधुना धनुर्मितीर्वदेती॥
पूर्वसूत्रक्रमेणाभीष्टधनुःखंडेभ्यो ए गुणाः ज्ञातास्तेषामिसर्थः॥ ज्याभौर्वीशिंजिनीगुणइसमरोक्तेः॥
भोगणितिकगणिताभिसयदिते धनुर्गुणक्रिया गणितेजनितेनैपुणमस्ती॥ धनूंषिच गुणाभ्यो तेषां
क्रियाकर्तजाताइति रस्मादितूरानयनप्रकाररूपविघते यस्मिं स्तथाभूते गणिते नैपुणं निपुणत्वं यद्य
स्मिं स्तर्हि वदेसर्थः॥ अथपूर्वागतजीवानां न्यासः॥ ४२।८२।१२०।१५४।१८४।२०८।२२५।२३५।२४०
अत्र प्रथम जीवा ४२ परिधिः ७५४ अथव्यासाब्धि घातः १५० अनेन मौर्वीयुता सती जातो भाजकः १००२
७५४

5

अथ परिधि वर्गः ५५८५१६ अयं जीवाघ्निणा ८८ गुणितः २३०७७५७२।४ तथा पंचभिर्गुणितः ११९३८८
अस्मिन्पूर्वभाजकेन भक्ते लब्धः २९७८७ इदं परिवर्ग-चतुर्थभागादस्मात् १४२१२९ विशोध्य शेषं ११२३४१
अस्य मूलं ३३५ इति दलात् ३७७ पतितं सच्छेषं जातं धनुः ४२ एवं सर्वजीवाभ्यो धनूंषि ४२।८४।१२५।१६८
२१०।२५२।२९४।३३५।३७७। अथ व्यास एवा वृत्तितः परिधिः १८ व्यासः २०० पूर्ववद्भाजकः १००२ अथ परिधिवर्गः
३२४ असौ जीवाघ्निणा ८८ हृतभामपवर्तितेन ८८ गुणितः ५६०४ छेदभक्तः ३४०२ पंचगुणितश्च १७०१०
पूर्वभाजकेन हृतो लब्धं १७ इदं परिधिवर्ग-चतुर्थभागात् ८१ पतितं सच्छेषं ६४ अस्य मूलं ८ इति दलात् ९ पतितं
सच्छेषं धनुः १ एवमवर्तितानि धनूंषि ॥ १।२।३।४।५।६।७।८।९ एवमन्यानि ग्रंथविस्तरभयाद्ग्रंथेनानुक्तानि
इत्ते क्षेत्रावलयरूपाणि क्षेत्राण्युत्पन्नं ते ॥ श्रीशंवदे ॥ श्रीशंकरं नौमि जगद्विभाविनं ॥ श्रीशंकरं वंदे ॥ श्रीशंकरं वंदे

॥२८

KKSU LIBRARY RAMTEK 441 106 M/1071 Dist Nagpur

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.10.20 11:16
,TRANSFERRED=2020/10/06 at 11:18:32
,PAGES=6
,TYPE=STD
,NAME=S0003902
,Book Name=M-1011-ABHISHTDHANU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection